

यश्छन्दसाम्-ऋषभो विश्वरूपः । छन्दोभ्योऽध्यमृताथ्-संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव-धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोसि मेधया पिहितः । श्रुतं मे गोपाय ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ मेधासूक्तम् ॥

ॐ मेधादेवी जुषमाणा न आगाद् विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः । त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्री-रुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्कर स्रजा ।

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः । दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्-जुषताग् स्वाहा ॥

आमां मेधा सुरभि-र्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥

मयि मेधां मयि प्रजां मय्यग्निस्-तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

मातृकायै च विद्महे महा सरस्वत्यै च धीमहि । तन्नो वाणी प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Chinmaya Somnath, CMWRC



yaśchandasām-ṛṣabhō viśvarūpaḥ | chandōbhyōऽdhyamṛtāth-
saṁbabhūva | sa mēndrō mēdhayā spṛṇōtu | amṛtasya dēva-dhāraṇō
bhūyāsam | śarīraṁ mē vicarṣaṇam | jihvā mē madhumattamā |
karṇābhyāṁ bhūriviśruvam | brahmaṇaḥ kōśōsi mēdhayā pihitaḥ | śrutaṁ
mē gōpāya || ōṁ śāntiḥ śāntiḥ śāntiḥ ||

# || mēdhāsūktam ||

ōṁ mēdhādēvī juṣamāṇā na āgād viśvācī bhadrā sumanasya mānā |
tvayā juṣṭā nudamānā duruktān bṛhadvadēma vidathē suvīrāḥ |
tvayā juṣṭa ṛṣirbhavati dēvi tvayā brahmāऽऽgataśrī-ruta tvayā |
tvayā juṣṭaścitraṁ vindatē vasu sā nō juṣasva draviṇō na mēdhē ||
mēdhāṁ ma indrō dadātu mēdhāṁ dēvī sarasvatī |
mēdhāṁ mē aśvināvubhāvādhattāṁ puṣkara srajā |
apsarāsu ca yā mēdhā gandharvēṣu ca yanmanaḥ |
daivīṁ mēdhā sarasvatī sā māṁ mēdhā surabhir-juṣatāgsvāhā ||
āmāṁ mēdhā surabhir-viśvarūpā hiraṇyavarṇā jagatī jagamyā |
ūrjasvatī payasā pinvamānā sā māṁ mēdhā supratīkā juṣantām ||
mayi mēdhāṁ mayi prajāṁ mayyagnis-tējō dadhātu
mayi mēdhāṁ mayi prajāṁ mayīndra indriyaṁ dadhātu
mayi mēdhāṁ mayi prajāṁ mayi sūryō bhrājō dadhātu ||
mātṛkāyai ca vidmahē mahā sarasvatyai ca dhīmahi |
tannō vāṇī pracōdayāt || ōṁ śāntiḥ śāntiḥ śāntiḥ ||